# ग्रन्थसमीक्षणम्

**श्रीमती सुदेश आहूजा**

**'संलापसरणिः' रचयिता रवीन्द्रकुमारः पण्डा, अर्वाचीनसंस्कतसाहित्यपरिषद्, बडौदा, प्र.सं. २००६ मूल्यम् १००रूप्यकाणि।**

आधुनिकसंस्कतवाङ्मये डॉ. रवीन्द्रकुमारपण्डामहोदयस्य महत्त्वपूर्णं स्थानं वर्तते। 'संलापससरणिः' पण्डामहाभागस्य सद्यः प्रकाशितं पुस्तकं अस्ति। अस्मिन् पुस्तके बालानाम् सामान्यसंस्कताध्येतृणाम् च कते संलापाः संरचिताः।

संस्कतभाषां प्रति सामान्यधारणा वर्तते यत् संस्कतभाषा अतिकठिना। इति मत्वा छात्राः संस्कतभाषां न पठन्ति, न च वदन्ति। लेखकस्य प्रयोजनं संस्कतभाषायाविषयकीं इमां धारणां निर्मूलीकत्य पाठकानां सुखबोधाय सरलसंस्कतभाषायां लघुवाक्यरचना अस्ति। अस्मिन् पुस्तके एकोनत्रिंशत् संलापाः सन्ति। प्रत्येके संलापे लेखकेन को पि संदेशः दत्तः। प्रथमसंलापे 'गोविन्द–गोपालयोः' परस्परसंवादः अतिसरलसंस्कतभाषायाम् वर्तते। यथा :–

''गोपालः– कथं कार्यं चलति?

गोविन्दः– यथा तथा चलति। न को पि विशेषः कार्यभारेण मम श्वसितुमपि समयो नास्ति। कालः कथं पलायते न प्रतीयते। कर्मणि सुखमस्ति।

एवमेव द्वितीये संलापे सरलसंस्कत–वार्तालापमध्ये संस्कतग्रन्थानां, प्रमुखकवीनाम् सूक्तयः संलापं अधिकं तरलीकुर्वन्ति। 'न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मगाः'' इति सुभाषितमाध्यमेन लेखकः कर्मस्य महत्त्वं प्रतिपादयति, सामान्यजनान् कर्मकर्तुं प्रेरयति च। सरललघुवाक्यानां मध्ये सुभाषितमाध्यमेन कविः जीवनस्य महत्–संदेशं ददाति।

ततीये संलापे दैनिकदिनचर्यामाध्यमेन लेखकः आत्मज्ञानजडविज्ञानयो उभयोः प्रयोजनं निर्दिशति। विज्ञानस्य प्रयोजनं उद्देश्यं च कथयित्वा निष्कर्षरूपेण लेखकः कथयति यत् ''यदा कदा सामान्यकथनमपि लाभदायकं भवति।''?

संलापानां मध्ये नवीनशब्दानां प्रयोगः यत्र तत्र दश्यते। यथा– अवस्कारपात्राय (dustbin) 'संकरनिचयस्थानम्' प्रयोगः कतः। लोकप्रचलितहिन्दीन्यायानां (मुहावराणाम्) प्रयोग अपि दश्यते यथा–

'ममोदरे मूषको धावति।'' लघुदष्टान्तानां माध्यमेन संवादा अधिकसुबोधाः जाताः। यथा– ''जीवनं शून्यमिव जातम्''।

वनभूमिरिव मनो जातम्''।

पंचमे संलापे मालतीमाधवयोः संलापः अत्यन्तं रुचिकरं मनोरंजकं च अस्ति। उदाहरणार्थम्–

मालती– अद्यानुभूतं त्वं किं वस्तु। त्वं सर्पिणी। दशनं तव स्वभावजम्।

माधवः– (स्मितं हसित्वा) तर्हि त्वं सर्पः।

मालती– अहं कथं सर्पः?

माधवः– यदि त्वं न सर्पः, अहं कथं सर्पिणी?

लेखकस्य संस्कतभाषां प्रति चिंता सर्वत्र दश्यते। अतएव त्रयोदशसंलापे लेखकः कथयति यत् ''अस्माकं देवभाषा शनैः शनैरपक्षीयते। अस्माकं शास्त्राणि त्यज्यन्ते। अस्माकं धर्मधारा न पूज्यते। तदर्थं मया कठिनं श्रमं कतम्। सेवा कता। ईश्वरदत्तप्रतिभायाः सदुपयोगः कतः।

लघुवाक्यानाम् माध्यमेन लेखकः जगतः महतीं समस्यां प्रति ध्यानाकर्षणं करोति। सप्तदशसंलापे धर्माधर्मयोः मध्ये अतिसुन्दरं रुचिकरं संलापो वर्तते। कलियुगे धर्मस्य शिथिलता अधर्मस्य च प्रभावः दरीदश्यते।

अधर्मस्य प्रभावेण जना न्यायमार्गं त्यजन्ति, सत्यं तिरस्कुर्वन्ति, नीतिं त्यजन्ति, मोहमदिरां पिबन्ति, सदाचारं विहाय भ्रष्टाचारं कुर्वन्ति। पण्डिताः सरलाः दण्डिताः च शासका भ्रष्टाचारिणः च इत्थम् संलापानाम् मध्ये वर्तमानकालस्य विषमतानां याथातथ्यं वर्णनं वर्तते। सामान्यवार्तालापमध्ये लेखकः गम्भीरदार्शनिकप्रश्नान् न विस्मरति। अतः 'कारणं बिना कार्यं न भवति' इति सामान्यनियममध्ये 'यत्र यत्र धूमस्तत्र तत्र बह्निः' इति अनुमानप्रमाणस्य व्याप्तिज्ञानं बोधयति। 'ईश्वर अस्ति न वा' इति महत्त्वपूर्णं बिन्दुं अधिकत्य एकः संलापः वर्तते। एकस्मिन् संलापे कष्णार्जुनयोः संवादमाध्यमेन लेखकः गीतायाः ज्ञानं, कर्मसिद्धान्तं, आत्मनः अमरतायाः, नश्वरशरीरस्य स्थितिं च वर्णयति। वर्तमानयुगे वेदाध्ययनस्य महत्त्वं, संस्कतभाषायाः प्रचारप्रसारयो उपयोगितां, व्यवहाररूपेण संस्कतभाषायाः महत्त्वं संस्कतभाषायाः सारल्यं च अधिकत्य स्वविचारान् प्रकटयति।

लेखकमते वर्तमानयुगे संस्कतभाषाया महती आवश्यकता वर्तते। संगणकयन्त्रे अपि संस्कत–भाषा उपकारिणी विद्यत इति वैज्ञानिकाः

चिन्तयति। वर्तमाने संस्कतज्ञातारः प्राचीनपाण्डित्यपूर्णपद्धतिं परित्यज्य संस्कतभाषायाः सरलीकरणाय प्रयत्नशीलाः भवन्ति। लेखकस्य पीडा वर्तते यत् संस्कतपाठकाः मूलसंस्कतपाठं न पठन्ति, अपितु अनुवादं पठन्ति। लेखकस्य चिन्ता समीचीना। यदि संस्कतपाठकाः छात्राश्च संस्कतं न पठन्ति, न वदन्ति तर्हि संस्कतं कः पठेत्? संस्कतभाषायाः प्रचारप्रसारार्थम् लेखकरवीन्द्रपण्डामहाभागेन सरलसंस्कतभाषायां 'संलापसरणिः' इति पुस्तकं लिखित्वा संस्कतपाठकानाम् महदुपकारः कतः। सरलसंस्कतवार्तालापमध्ये लेखकः सामयिकी समस्यानां वर्तमानकालस्य असन्तोषमयजीवनं, दुःखमयसंसारं प्रति चिन्ताशीलः वर्तते।

लेखकस्य 'संलापसरणिः' माध्यमेन संस्कतभाषायाः प्रचारप्रसारः, एतेन प्रमुखप्रयोजनेन सह वर्तमानजीवनस्य सामयिकसमस्यानां वर्णनम् अपि आनुषंगिकं प्रयोजनं वर्तते। संलापानां मध्ये रवीन्द्रपण्डामहोदयस्य संवेदनशीलः कविरुपः यत्र तत्र अवश्यं दश्यते। भाषा सरला, सहजा, निर्बाध–रूपेण स्वोद्देश्यं सिद्धयति। वार्तालापमध्ये सूक्तीनां प्रयोगेण लोकोक्ति–मुहावराणां प्रयोगेण च भाषा अधिका तरला प्रवाहमयी च।

*A-1 शिवनगर, बारॉ रोड, कोटा*
*(राज.)–324001*

*---000---*